# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्रीप्रथम, सेमेस्टर-१** | **प्रश्नपत्रम् - ८** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CE-1.1.2** | **समयः - ०३-०६** |
| **दिनाङ्कः - १४.१२.२०१६** | **ग्रन्थः -** *वाल्मिकीयरामायणान्तर्गतः(सुन्दरकाण्डः)सर्ग१तः३४* | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसंगं संस्कृते भावर्थो लेख्यः ०८**

(१) *यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः ।*
*बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ॥*

(२) *योजनानां शतं श्रीमांस्तीर्त्वाप्युत्तमविक्रमः ।*
*अनिःश्वसन् कपिस्तत्र न ग्लानिमधिगच्छति ॥*

(३) *परेण तपसा लेभे यत् कुबेरः पितामहात् ।*
*कुबेरमोजसा जित्त्वा लेभे तद् राक्षसेश्वरः ॥*

**प्रश्नः २ एकस्योत्तरं सविस्तरं ददत । ०८**

(१) *हनुमतः समुद्रलंघनवर्णनम् ।*

(२) *मैनाककृतहनुमत्स्वागतम् ।*

**प्रश्नः ३ टिप्पणीद्वयं लिखत ०४**

*(१) हनुमत्कृतात्मकावलोकनम् ।*

*(२) चन्द्रोदयवर्णनम् ।*

*(३) पुष्पकविमानम् ।*

*(४) सुरसास्वरुपम् ।*

**प्रश्नः ४ पञ्चानाम् अतिलघूत्तराणि दयानि । ०५**

(१) *वाल्मीकिरामायणे कति काण्डाः ?*

(२) *चन्द्रोदयवर्णनं कस्मिन् सर्गे प्रतिपादितम् ?*

(३) *हनुमतः पितुर्नाम किम् ?*

(४) *मन्दोदरी कस्य भार्या ?*

(५) *वायुपुत्रेण सीता कुत्र अवलोकिता ?*

(६) *"रामायणम्" इत्यत्र कः समासः ?*

(७) *पुष्पकविमानवर्णनम् कस्मिन् सर्गे ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ द्वयोः ससन्दर्भप्रसङ्गं संस्कृते भावर्थो लेख्यः ०८**

(१) *क्षिप्रमुत्पततो मन्ये सीतामादाय राक्षसः ।*
*बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥*

(२) *मार्गमाणो वरारोहां राजपुत्रीमनिन्दिताम् ।*
*सुखप्रसुप्तान् विहगान् बोधयामास वानरः ॥*

(३) *तां देवीं दीनवदनामदीना भर्तृतेजसा ।*
*रक्षितां स्वेन शीलेन सीतामसितलोचनाम् ॥*

**प्रश्नः ६ एकस्य सविस्तरम् उत्तरं लिखत ।** **०८**

(१) *सीताग्रे हनुमत्कृतरामकथावर्णनम् ।*

(२) *अशोकवाटिकायाम् सीतायाः स्थितिवर्णनम्*

**प्रश्नः ७ एकां टिप्पणीं लिखत** **०२**

*(१) लङ्कानगरी ।*

*(२) अशोवाटिका ।*

**प्रश्नः ८ द्वयोः लघूत्तरं देयम् ।** **०२**

*(१) पुष्पकविमानं केन रचितम् ?*

*(२)हनुमतः मातुर्नाम किम् ?*

*(३)सीतायाः अन्वेषणम् केन कुत्र कृतम् ?*

*(४) रावणस्य पितुर्नाम किम् ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ द्वयोःससन्दर्भप्रसंगं संस्कृते भावार्थो लेख्यः ।** **०८**

(क) *ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् ।*
*विवृत्य नयने कोपान्मार्जारसदृशेक्षणा ॥*

(ख) *आत्मानं स्वादतानार्थ न सीतां भक्षयिष्यथ ।*
*जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥*

(ग) *अहं रामस्य संदेशाद् देविं दूतस्तवागतः ।*
*वैदेहि कुशली रामः स त्वां कौशलमब्रवीत् ॥*

**प्रश्नः १० एकस्योत्तरं सविस्तरं लिखत ।** **०८**

(१) *हनुमत्कृतलंकापतितन्नारीदर्शनं वर्णयन्तु ।*

(२) *हनुमत्कृतलंकापुरीदहनं सम्यक् वर्णयन्तु ।*

**प्रश्नः ११ द्व टिप्पण्यौ लिखत ।** **०४**

(१) *सीतारावणयोः संवादः ।*

(२) *रामस्य शारीरिकचिह्नानां वर्णनम् ।*

(३) *त्रिजटायाः स्वप्नवृत्तान्तम् ।*

(४) *सीतायाः प्राणत्यागवर्णनम् ।*

**प्रश्नः १२ पञ्चानां लघूत्तराणि देयानि ।** **०५**

*(१) अशोकवाटिकायाम् सीतायाः कीदृशी अवस्थाऽसीत् ?*

*(२) श्रीरामकथावर्णनं कस्मिन् सर्गे प्रतिपादितम् ?*

*(३) पञ्चविंशति सर्गे कः प्रसङ्गः विवर्णितः ?*

*(४) अशोकवाटिकायां सीतां दृष्ट्वा हनुमान् कुत्र संवृतोऽभवत् ?*

*(५) नरपुङ्गवः कोऽस्ति ?*

*(६) श्रीरामकथा सीतां प्रति केन कथिता ?*

*(७) 'रामायणम्' इत्यस्य विग्रहः लिखतु ।*

=०=